Ex/Sans/PG/1.2/2018

# MASTER OF ARTS EXAMINATION, 2018

(1st Year, 1st Semester)

## SANSKRIT

## Course : II

## [Vedic Studies]

Time : Two Hours Full Marks : 30

*The figures in the margin indicate full marks.*

1. अध:स्थितेषु प्रश्नेषु **त्रितयस्य** संस्कृतभाषया देवनागर्या लिप्या च समाधानं कार्यम्। 1×3=3

   (a) कौषीतकिब्राह्मणस्य नामान्तरं किम्? तत्र कति अध्याया: वर्तन्ते?

   (b) यजुर्वेदाथर्ववेदयो: प्राचीनं नामद्वयं लिख्यताम्।

   (c) कल्पसूत्राणां रचयितॄणां नामद्वयं लेखनीयम्।

   (d) किं तावत् शुल्बसूत्रम्? तत्र शुल्बशब्दस्य कोऽर्थ:?

2. अधोनिर्दिष्टेषु **एकस्य** प्रश्नस्य उत्तरं प्रदेयम्। 7×1=7

   (a) वैदिकसाहित्यस्य ब्राह्मणभागे केषां वेदभागानाम् अन्तर्भुक्ति:? समासतो व्याख्यायताम्।

   (b) वेदाङ्गेषु शिक्षाग्रन्थं व्याकरणग्रन्थं चाश्रित्य संक्षेपत्त: कश्चन प्रबन्धो रचनीय:।

[*Turn over*]

3. अधस्तनेषु **त्रयाणां** प्रश्नानाम् उत्तरं प्रदेयम्। न्यूनतणां **एकस्य** उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्। 5×3=15

   (a) ऋषिच्छन्दोदेवतानिर्देशपुरःसरम् अरण्यानीसूक्तस्य निसर्गभावना सम्यक् वर्ण्यताम्।

   (b) विश्वामित्र-नदीसूक्तं कथं संवादात्मकम्? आख्यानभागनिरूपणपूर्वकं सूक्तस्यास्य गुरुत्वं पर्यालोचनीयम्।

   (c) भवदधीतम् ऋग्वेदीयविष्णुसूक्तम् आश्रित्य विष्णुदेवतायाः स्वरूपविषये कश्चन नातिदीर्घः प्रबन्ध उपस्थाप्यताम्।

   (d) शुक्लयजुर्वेदसंहितायाः रुद्राध्याये रुद्रदेवतायाः गिरिशन्तरूपं विशेषणं यदुपलभ्यते तद् भाष्यसरणिमनुसृत्य स्पष्टीक्रियताम्।

   (e) ''ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे।'' — इति मन्त्रे इन्द्रदेवमुद्दिश्य यदुक्तं तस्य तात्पर्यं निरूप्यताम्।

4. अधःस्थितेषु **द्वयोः** पदयोः स्वरसंचारः सूत्रनिर्देशपुरःसरं विचारणीयः। 1½×2=3

   (a) गायत्रिणः।

   (b) अर्कम्।

   (c) स्तवते।

   (d) जवेते।

5. अधोलिखितेषु **द्वयोः** शव्दयोः ससूत्रं पदसाधनं करणीयम्। 2×1=2

   (a) विश्वा।

   (b) उशती।

   (c) एना।

   (d) ऋतावरी।

---